# shArikAstotram 2

# શારિકાસ્તોત્રમ્ ૨

## Document Information

Text title : shArikAstotram 2

File name : shArikAstotram2.itx

Category : devii, devI, dashamahAvidyA, dhyAnam

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : BhaktivivekasAra

Latest update : November 18, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 7, 2022

*sanskritdocuments.org*

# શારિકાસ્તોત્રમ્ ૨

શ્રીશારિકાધ્યાનમ્ અથવા શારિકાસ્તુતિઃ
બીજૈઃ સપ્તભિરુજ્જ્વલાકૃતિરસૌ યા સપ્તસપ્તિદ્યુતિઃ
સપ્તર્ષિપ્રણતાઙ્ઘ્રિપઙ્કજયુગા યા સપ્તલોકાર્તિહૃત્ ।
કશ્મીરપ્રવરેશમધ્યનગરીપ્રદ્યુમ્નપીઠે સ્થિતા
દેવી સપ્તકસંયુતા ભગવતી શ્રીશારિકા પાતુ નઃ ॥

જય ભગવતિ વિન્ધ્યવાસિનિ શ્મશાનવાસિનિ કૈલાસવાસિનિ
હુઙ્કારિણિ કાલાયનિ કાત્યાયનિ હિમગિરિતનયે કુમારમાતઃ
ગોવિન્દભગિનિ શિતિકણ્ઠકણ્ઠાભરણે અષ્ટાદશભુજે
ભુજગવલયમણ્ડિતે કેયૂરહારાભરણે જય ખડ્ગત્રિશૂલડમરુ-
મુદ્ગરપરશુશશિકલાશરચાપવરાભયપાશપુસ્તકકપાલખટ્વાઙ્ગ-
ગદામુસલતોમરવરહસ્તે કૃપાપરે પ્રભૂતવિવિધાયુધે ચણ્ડિકે
ચણ્ડઘણ્ટે કિરાતવેષે બ્રહ્માણિ રુદ્રાણિ નારાયણિ બ્રહ્મચારિણિ
વેદમાતઃ ગાયત્રિ સાવિત્રિ સરસ્વતિ સર્વાધારે સર્વેશ્વરિ વિશ્વેશ્વરિ
સર્વકર્ત્રિ સમાધિવિશ્રાન્તિમયે ચિન્મયે ચિન્તામણિસ્વરૂપે
કૈવલ્યે કૈવલ્યસ્વરૂપે શિવે નિરાશ્રયે નિરુપાધિમયે
બ્રહ્મવિષ્ણુમહેશ્વરનમિતે મોહિનિ તોષણિ ભયઙ્કરનાશિનિ
દિતિસુતપ્રમથિનિ કાલે કાલાગ્નિશિખે કાલરાત્રે અજે નિત્યે
સિંહરથે યોગરતે યોગીશ્વરનમિતે ભક્તજનવત્સલે સુરપ્રિયે
કારુણ્યે દુર્ગે દુર્જયે હિરણ્યે શરણ્યે કુરુ મે જયં, કુરુ માં દયાં
કુરુ માં કૃપામ્ ॥

શ્રીશારિકે શરણ્યે ત્વાં મયિ દાસે કૃપાં કુરુ ।
ઋણં રોગં ભયં શોકં રિપૂન્નાશાય સત્વરમ્ ॥

પ્રદ્યુમ્નશિખરાસીનાં માતૃચક્રોપશોભિતામ્ ।
પીઠેશ્વરીં શિલારૂપાં શારિકાં પ્રણમામ્યહમ્ ॥

ઉમા માઽવતુ કામા ચ ચાર્વઙ્ગી ટઙ્કધારિણી ।
તારા ચ પાર્વતી ચૈવ યક્ષિણી શારિકાષ્ટમી ॥

શન્તિં નયસ્યાશુ જનસ્ય પાપં રિક્તત્વમર્થેન નિરાકરોષિ ।
કાયં નિષિઞ્ચસ્યાપિ ભાગ્યપૂરૈઃ પ્રગીયસેઽતઃ ખુલ શારિકાત્વમ્ ॥

ઇતિ શારિકાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shArikAstotram 2*

pdf was typeset on May 7, 2022

Please send corrections to *sanskrit@cheerful.com*